दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् वैशाखकृष्णामावस्या
बैशाख 04 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-175 1 अप्रैल 17, 2026 Website- www.himsanskritam.com Email-himsanskrit@gmail.com

2 रजनी पाटिल अवदत्- जनगणनां विना महिला- आरक्षण- विधेयकं न स्वीकार्यम्, सङ्घटने अन्याः नियुक्तयः भविष्यन्ति

3 अनुरागशर्मणा राज्यसभा-सांसदत्वेन शपथग्रहणं कृतम्, हिमाचलस्य विषयान् उत्थापयितुं कृतः सङ्कल्पः

4 बिहारराजनीतिक्षेत्रे नीतीशयुगस्य समापनं सम्राटयुगस्य शुभारम्भश्च अभवत्

## नारीशक्ति-वन्दनम्-: लोकसभायां महिला-आरक्षण-सम्बद्धानां त्रयाणां विधेयकाणां चर्चा।



**ऐतिहासिकं सोपानम्: प्रधानमन्त्रिणा मोदी-वर्येण नारीशक्तेः नेतृत्वस्य महत्त्वं प्रतिपादितम्।**

प्रधानमन्त्री नरेन्द्रमोदी अवधानं प्रदत्तवान्, यत् देशस्य पञ्चाशत् प्रतिशतं यावत् जनसङ्ख्या निर्णयक प्रक्रियायाः भागः भवेत् । सः अवदत् यत्, नारीशक्तिः देशस्य विकासे महत्त्वपूर्णां भूमिकां निर्वहति, तथा च नीतिनिर्धारणे ताभ्यः समुचितं नेतृत्व-प्रदानं वर्तमानकालस्य आवश्यकता अस्ति। श्रीमोदी लोकसभायां नारीशक्ति-वन्दन्-अधिनियमेत्यस्य संविधान संशोधन-सम्बद्धानां त्रयाणां प्रमुखानां विधेयकाणां विषये चर्चावधौ इदम् उक्तवान्। संविधानः (एकत्रिंशोत्तरैकशत संशोधन) विधेयकम् विंशति षड्विंशति, परिसीमन विधेयकम्, विंशति षड्विंशति, तथा च केन्द्र-शासित-विधिः (संशोधन) विधेयकम्, विंशति षड्विंशति, इति त्रयः विधेयकाः सन्ति। सः अवदत् यत्, ये अधुना अस्य विधेयकस्य विरोधं करिष्यन्ति ते भविष्ये परिणामान् सम्मुखी करिष्यन्ति । चर्चायां भागं स्वीकृत्य समाजवादीति-दलस्य सांसदः अखिलेशः यादवः अवदत् यत् तस्य दलं महिलानाम् आरक्षणस्य समर्थनं करोति। परञ्च सः एतादृशं महत्त्वपूर्णं विधानं शीघ्रतायाम् आनेतुं प्रश्नं पृष्टवान्। सः अवदत् यत् नूतनस्य जनगणना-अभियानस्य समाप्तेः अनन्तरं एव महिला-आरक्षण-विधेयकं प्रवर्तनीयम्। तेलुगु-देशम्-दलस्य नेत्रि डा. बाय रेड्डी शबरी इत्येषा अवदत् यत् अद्यत्वे महिलाः मूलस्तरात् राष्ट्रियस्तरं यावत् राष्ट्रस्य नेतृत्वं कर्तुं सज्जाः सन्ति । शासनक्षेत्रे महिलानां सहभागित्वं वर्धयितुं उद्दिष्टम् एतत् महत्त्वपूर्णं विधेयकम् आनेतुं सा प्रधानमन्त्रिणं नरेन्द्रमोदिनं प्रति धन्यवादं प्रकटितवती। केन्द्रीय-विधि-न्याय-मन्त्री अर्जुन-मेघवालः अद्य लोकसभायां संविधानस्य (एकत्रिंशोत्तरैकशततमं संशोधन) विधेयकं परिसीमन-विधेयकं च स्थापितवान्। गृहमन्त्री अमितशाहः लोकसभायां केन्द्र शासित क्षेत्र-विधि (संशोधन) विधेयकं स्थापितवान्। विधेयकं उपस्थापयन् विधि-न्याय-मन्त्री अर्जुनराम मेघवालः उक्तवान् यत् अयं दिवसः ऐतिहासिकः, सर्वकारः महिलानां राजनैतिक-न्यायार्थं कार्यं कुर्वन् अस्ति। डॉ. बी. आर. अम्बेडकर-वर्यस्य उद्धरणं प्रकटयन् मेघवालः अवधानं दत्तवान् यत् समुदायस्य प्रगतिः महिलानां प्रगत्या एव माप्यते। चर्चावधौ, काङ्ग्रेस दलस्य सांसदः गौरव गोगोईः अवदत् यत् तस्य दलं महिला-आरक्षण विधेयकस्य पक्षे अस्ति, परन्तु एतस्य सरलीकरणं भवेत्, परिसीमनेन सह सम्बद्धः न भवेत्। सः अवदत् यत् लोकसभायां विद्यमानानां त्रिचत्वारिंशदधिक पञ्चशतासनानाम् आधारेण आरक्षणं भवेत्।

## भारत-आस्ट्रिया मैत्री-: प्रधानमन्त्री मोदी आस्ट्रिया-चान्सलर महोदयः च मिलित्वा द्विपक्षीय-सन्धयः कृतवन्तः



प्रधानमन्त्रिणा नरेन्द्रमोदिना नवदिल्ल्याम् ऑस्ट्रिया-देशस्य चान्सलर् डा. क्रिश्चियन् स्टॉकर इत्यनेन सह वार्तालापः कृतः। उपवेशने भारत-आस्ट्रिया-देशौ खाद्यसुरक्षायां, सहकारे सैन्यविषये च आशयपत्रम्, भयोत्पादनविरोधे, संयुक्तकार्यसमूहस्य विषये च अनेकेषां सन्धि पत्राणां च आदानप्रदानं कृतवन्तौ। संयुक्त-वार्ताहरसम्मेलनं सम्बोधयन् प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् भारतम् आस्ट्रिया च मूलसौकर्ये, नवीनतायां, सुस्थिरतायां च विश्वसनीय-सहभागिनौ स्तः। श्रीमोदी इत्यपि अवदत् यत् चांसलर-महोदयस्य यात्रया उभयोः देशयोः मध्ये व्यापारः निवेशः च प्रवर्धिताः भविष्यन्ति। प्रधानमन्त्री श्रीमोदी अवदत् यत् भारतं, स्वस्य गत्या, परिमाणेन च सह आस्ट्रिया-देशस्य विशेषज्ञैः सह मिलित्वा विश्वस्य कृते विश्वसनीयं तन्त्रज्ञानं सुनिश्चितं करिष्यति। आस्ट्रिया-देशस्य चान्सलर् डा. क्रिश्चियन् स्टॉकर वर्यः तस्य भारतयात्रां आस्ट्रिया-भारत-सम्बन्धानां कृते महत्त्वपूर्णम् इति वर्णितवान्। सः अवदत् यत् आस्ट्रिया-भारत-देशयोः राजनैतिक-सम्बन्धाः अधुना इतोपि सुदृढाः अभवन्।

## सुभाषितम्

**ज्ञानशून्या नरा ये तु,**
**पशवः परिकीर्तिताः।**
**तस्मात् संसारमोक्षाय,**
**परं ज्ञानं समन्यसेत्।।**

भावार्थः- ज्ञानशून्य मनुष्य पशु के समान होते हैं। अतः संसार बन्धन से मुक्ति के लिए परम ज्ञान का अभ्यास करना चाहिए।




## परमाणु-प्रगतिः-: कलपक्कम्-नगरे 'प्रोटोटाइप-फ़ास्ट-ब्रीडर-रिएक्टर' इत्यस्य साफल्यं लोकसभाध्यक्षेण प्रशंसितम्



लोकसभायाम् भारतस्य परमाणु ऊर्जा-कार्यक्रमः, स्वदेशीरूपेण परिकल्पितं, निर्मितं च तमिळ्नाडु-राज्यस्य कलपक्कम्-नगरस्य प्रोटोटाइप-फ़ास्ट-ब्रीडर-रिएक्टर इति महत्त्वपूर्णतां प्राप्नोत् इति प्रशंसितम्। लोकसभायाः अध्यक्षः ओम बिरला-वर्यः अवदत् यत् भारतस्य वैज्ञानिक-प्रगति-प्रक्रियायां, प्रौद्योगिकीय-स्वावलंबन-प्रक्रियायां च एषा महती उपलब्धिः अस्ति। लोकसभायाः अध्यक्षः अवदत् यत्, एतत् ऐतिहासिकं सोपानं परमाणु ऊर्जा-अभियानं गतिं प्रदत्तं तथा च सप्तत्यधिक द्विसहस्रतमवर्षं पर्यन्तं शुद्ध-शून्य-उत्सर्जनं प्राप्तुं भारतस्य वैश्विकप्रतिबद्धतां सुदृढम् अकरोत् ।

## प्रधानमन्त्री मोदी फ्रांस-देशस्य राष्ट्रपति-मैक्रों इत्यनयोः मध्ये पश्चिम-एशिया-विषये विमर्शः



फ्रांस-देशस्य राष्ट्रपतिना इमैनुएल-मैक्रों महोदयेन प्रधानमन्त्रिणं नरेन्द्रमोदिनं प्रति दूरभाषं कृत्वा पश्चिम-एशिया-क्षेत्रस्य स्थितेः विषये चर्चा कृता। सामाजिक-माध्यमे (Social Media) एकां प्रविष्टिं कुर्वन् प्रधानमन्त्री उक्तवान् यत् वार्तालाप-समये उभौ पक्षौ 'होर्मुज'-जलसन्धि-क्षेत्रे सुरक्षां नौवहनस्य स्वतन्त्रतां च सद्यः पुनर्स्थापयितुं आवश्यकता अस्ति इति विषये सहमतौ अभवताम्।प्रधानमन्त्री इदमपि अवदत् यत् तौ क्षेत्रे ततः बहिः च शान्तिं स्थिरतां च प्रवर्धयितुं घनिष्ठ सहयोगं निरन्तरं कर्तुं प्रतिबद्धतां प्रकटितवन्तौ।

## स्वच्छ-ऊर्जा-क्षेत्रे भारतस्य वैश्विकी स्थितिः सुदृढा- केन्द्रीयमन्त्री डॉ. जितेन्द्रसिंहः

विज्ञान-प्रौद्योगिकी-राज्यमन्त्री डॉ. जितेन्द्रसिंहः उक्तवान् यत्, नीतिगत-समर्थनेन, तकनीकी-नवाचारेण, उद्योगजगतः सन्तुलित-सहभागितया च भारतं स्वच्छ-ऊर्जा-क्षेत्रे वैश्विकस्तरे स्वस्थितिं सुदृढां करोति। नवदिल्ल्यां 'विश्व-पेट्रोकोल-काङ्ग्रेस' इत्यनेन सह आयोजिते 'विश्व-हाइड्रोजन-ऊर्जा-शिखरसम्मेलने' सम्बोधनकाले सः एतत् प्रतिपादितवान्। डॉ. जितेन्द्रसिंहः असूचयत् यत् देशः हरित-हाइड्रोजनं (Green Hydrogen) प्रवर्धयितुं, परमाणु-ऊर्जा-क्षमतायाः विस्तारं कर्तुं, नवीकरणीय-ऊर्जा-स्रोतः सुदृढं कर्तुं च सहैव महत्त्वपूर्णासु प्रौद्योगिकीषु स्वदेशी-क्षमतां विकसयति।

# रजनी पाटिल अवदत्- जनगणनां विना महिला- आरक्षण- विधेयकं न स्वीकार्यम्, सङ्घटने अन्याः नियुक्तयः भविष्यन्ति



**हिमसंस्कृतवार्ताः- शिमला।** काङ्ग्रेस-प्रदेश-विषयाणां प्रभारी रजनी पाटिल अवदत् यत् काङ्ग्रेसपक्षः महिला-आरक्षणस्य पक्षधरः अस्ति। काङ्ग्रेसपक्षः एव एतत् आनीतवान् आसीत्। अद्य महिला-आरक्षणं मुख्यविषयः नास्ति, अपि तु 'परिसीमनम्' मुख्यविषयः अस्ति। परिसीम्नः आधारः 'जनगणना' अस्ति। काङ्ग्रेसपक्षः इच्छति यत् प्रथमं जनगणना भवेत्, तदनन्तरं परिसीमनं तस्य आधारेण च आरक्षणं क्रियेत। जनगणनां विना अस्य कार्यान्वयनम् उचितं नास्ति। सम्प्रति २०११ वर्षस्य जनगणनायाः विवरणानि सन्ति। अधुना केन्द्रसर्वकारः निर्वाचन- लाभाय त्वरितगत्या एतत् परिवर्तितं कर्तुं प्रयतते।

पाटिलमहोदयया कथितं यत् आगामि- पञ्चायत- निर्वाचनं दृष्ट्वा पक्षसङ्घटनं भूमितले सुदृढं क्रियते। तया उक्तं यत् सुदीर्घकालानन्तरं सङ्घटनस्य पुनर्सङ्घटनं जातम् अस्ति, अधुना जनपदस्तरे एतत् सक्रियं कृत्वा निर्वाचन-सज्जाः तीव्रतराः क्रियन्ते। पाटिल-महोदयया उक्तं यत् सङ्घटने अन्याः नूतनाः नियुक्तयः भविष्यन्ति। अत्रापि 'एकः व्यक्तिः एकं पदम्' इति सिद्धान्तः प्रवर्तितं भविष्यति। तया घोषितं यत् काङ्ग्रेसपक्षः एकीभूतः अस्ति तथा च आगामिनिर्वाचने सुदृढतया अवतरिष्यति। पूर्वमन्त्रिणः कौलसिंह ठाकुरस्य कोपस्य विषये पृष्टे सति तया उक्तं यत् तस्य कोपस्य कारणानि प्रक्ष्यन्ते। किमर्थं सः रुष्टः अस्ति, तस्य अभिप्रायं ज्ञात्वा सः कोपः दूरीकरिष्यते।

## काङ्ग्रेसदलं त्यक्त्वा भाजपादलं न गमिष्यति आनन्दः

पूर्वकेन्द्रीयमन्त्रिणः आनन्दशर्मणः काङ्ग्रेस-पक्षात् कोपस्य वार्ताणां मध्ये पाटिलमहोदया शिमलानगरे तेन सह अमिलत्। द्वयोः मध्ये पक्षस्य विविधविषयेषु चर्चा अभवत्। रजनी-महोदया गुरुवासरे काङ्ग्रेसभवने प्रसारमाध्यमैः (मीडिया) सह सम्भाषणकाले अवदत् यत् पक्षे यः कार्यं करोति, सः कदाचित् रुष्टः अपि भवति। पक्षाय कार्यं कुर्वतां कोपः स्वाभाविकः अस्ति। तया स्पष्टीकृतं यत् आनन्दशर्मा पक्षे एव अस्ति, सः काङ्ग्रेस-दलं त्यक्त्वा कदापि भाजपा-दलं न गमिष्यति।

# मार्गे गच्छतः कस्यापि अकस्मात् हत्यायाः न कोऽपि तर्कः, पीडितपरिवाराणां शङ्काः दूरीकरोतु सर्वकारः- जयरामठाकुरः



**हिमसंस्कृतवार्ताः- मण्डी।** पूर्वमुख्यमन्त्री तथा विपक्षनेता जयरामठाकुरः भाजपाविधायकैः अधिकारिभिः च सह गुरुवासरे सरकाघाट-क्षेत्रस्य गोपालपुरं प्राप्तवान्। अस्मिन् अवसरे सः घटनास्थलस्य निरीक्षणं कृत्वा पूर्णविवरणं गृहीतवान्। तदनन्तरं सः मृतबालिकायाः मातापितृभ्याम् आत्मीयैश्च सह मिलित्वा सान्त्वनां प्रदत्तवान् तेषाम् उत्साहवर्धनं च कृतवान्। सः मृतिकायाः मातां मिलितवान्, यस्याः पीड़ा द्रष्टुं न शक्यते स्म। कस्यापि मातुः नेत्रेषु नेत्रं स्थापयितुं साहसं नासीत्। या पुत्री मातुः आश्रया भवति, तया सह एतादृश्याः अप्रियघटनायाः दुःखं शब्देषु प्रकटयितुं न शक्यते। सम्पूर्णे ग्रामे शोकव्याप्तः अस्ति, परिवारश्च आघाते वर्तते। गृहजनानां रोदनेन दयनीया स्थितिः अस्ति। जनाः अस्यां घटनायां विश्वासमेव कर्तुं न शक्नुवन्ति।

## तर्कहीनं कृत्यं गम्भीराः प्रश्नाश्च

जयरामठाकुरः अवदत् यत् एषा घटना स्वपृष्ठे बहून् प्रश्नान् त्यक्तवती अस्ति। पिता आत्मीयाश्च एनां सामान्यां घटनां मन्तुं न इच्छन्ति, यतोहि मार्गे गच्छतः कस्यापि अकस्मात् हत्यायाः न कोऽपि तर्कः भवति। घटनायाः चतुर्दिनानां पश्चादपि आरक्षकदलं कञ्चित् दृढनिर्णयं प्राप्तुं समर्थं नास्ति। सर्वकाराय निवेदनं वर्तते यत् परिवाराणां सर्वासामपि शङ्कानां समाधानं क्रियताम्। अन्वेषणे कस्मिन्नपि स्तरे किमपि शैथिल्यं न भवेत्। अद्य सा बालिका अस्माभिः सह नास्ति, तस्यै न्यायप्रदानमेव अस्माकं कर्तव्यम् अस्ति। अस्यां घटनायां सम्मिलितेभ्यः सर्वेभ्यः अपराधिभ्यः कठोरतमं दण्डं दापयितुमेव तस्यै अस्माकं सत्या श्रद्धाञ्जलिः भविष्यति। परिवारेण सह मेलनानन्तरं पत्रकारैः सह सम्भाषणकाले विपक्षनेता अवदत् यत् अद्य सम्पूर्णे क्षेत्रे गभीरशोकस्य आक्रोशस्य च वातावरणं वर्तते। न केवलं परिवारः, अपि तु सम्पूर्णस्य ग्रामस्य प्रदेशस्य च जनाः आघाते सन्ति, एकमेव प्रश्नं च पृच्छन्ति। अन्ते एषा भयावहा घटना कथं किमर्थं च अभवत्? प्रारम्भिकरूपेण इदं तथ्यं सम्मुखम् आगतं यत् अभियुक्तः नशासक्तः आसीत्, सम्भवतः नशावस्थायामेव सः एतत् जघन्यमपराधं कृतवान्। किन्तु अनेन बहवः गम्भीराः प्रश्नाः उद्भवन्ति। यदा अभियुक्तः मार्गेण घटनास्थलं प्राप्तवान्, तस्य समीपे शस्त्रं च आसीत्, तदा केनापि सः किमर्थं न निवारितः? सर्वतः बृहत् प्रश्नः अस्ति यत् अन्ते तेन 'सिया' (मृतिका) एव किमर्थं लक्ष्यीकृता?

## अन्वेषणे सन्देहः असुरक्षा च-

अन्वेषणप्रक्रियायाः विषये अपि गभीराः सन्देहाः उत्पद्यन्ते। परिवारः स्थानीयजनाश्च पूर्णसहयोगं कुर्वन्ति, किन्तु तेभ्यः अद्यावधि न तु अन्वेषणस्य दिशाम् अधिकृत्य किमपि उक्तं, नापि काचित् परिपुष्टा प्रगतिः सूचिता। अस्याः घटनायाः पश्चात् क्षेत्रे आतङ्कस्य वातावरणं वर्तते। लघुबालकाः विद्यालयं गन्तुं बिभ्यति। मातापितरः भीताः सन्तः बलात् बालकान् विद्यालयं प्रेषयन्ति। सः अवदत् यत् अद्यापि बालकैः विद्यालयं महाविद्यालयं च प्राप्तुं प्रायः २ किलोमीटर यावत् पादाभ्यां चलितव्यं भवति, यतोहि नियमितबस-सेवा सर्वकारेण स्थगिता अस्ति। प्रश्नः अयं वर्तते यत् एतत् क्षेत्रं आपदा-प्रभावितं नासीत्, अतः अत्र मार्गाणां किमपि हानिः न जाता, तर्हि एच. आर. टी. सी. (HRTC) द्वारा एषः मार्गः किमर्थं स्थगितः?

सः अवदत् यत् सा बालिका अधुना प्रत्यागन्तुं न शक्नोति, किन्तु यदि सर्वकारेण अस्मिन् प्रकरणे कठोरकार्यविधिं कृत्वा कश्चन उदाहरणं न प्रस्तुतं, तर्हि एतादृशानाम् अपराधिनां साहसं वर्धिष्यते। अस्मिन् अवसरे तेन सह भारतीय- जनतापार्टी- दलस्य विधयकाः अनिल शर्मा, विनोद कुमारः, राकेशजमवालः, इन्द्रजीत लखनपालः, इन्द्र सिंह गान्धी, त्रिलोक जमवालः, सरकाघाट-विधायकः दिलीप ठाकुरः, मण्डी-जनपदाध्यक्षः निहाल शर्मा इत्यादयः उपस्थिताः आसन्।

## संसदि विमर्शः-: महिला- आरक्षण-विधेयकस्य विषये पक्ष-विपक्षयोः विभिन्नाः विचाराः



राज्यसभायां भाजपेति दलस्य सदस्या मेधा कुलकर्णी इत्येषा अवदत् यत् एतत् नूतनस्य संसदः कृते ऐतिहासिकं क्षणम् अस्ति, यतः महिला-आरक्षण-विधेयकं भारतस्य विकासे महिलानां शक्तिं सुनिश्चितं करोति। सा प्रधानमन्त्रिणं नरेन्द्रमोदिनं प्रति धन्यवादं प्रकटयन्ती अवोचत् यत् सम्पूर्णः देशः, महिलाः च तं समर्थयन्ति । संसदभवन परिसरात् बहिः प्रसारमाध्यमैः सह वार्तालापं कुर्वन्ती भाजपेति दलस्य सांसदः संध्या रे इत्येषा उक्तवती यत् देशे महिलानां सशक्तीकरणाय एषः ऐतिहासिकः दिवसः अस्ति। भाजपेति दलस्य सदस्यः जगदम्बिका पालः अवदत् यत् भारतं लोकतन्त्रस्य जननी अस्ति, तथा च तस्यां लोकतन्त्रस्य जनन्यां ऊनविंशत्यधिक द्विसहस्रतमे वर्षे लोकसभानिर्वाचने महिलानां प्रतिनिधित्वं त्रयस्त्रिंशत् प्रतिशतं यावत् भविष्यति। आकाशवाण्या सह वार्तालापं कुर्वन्, श्रीपालः आरोपितवान् यत् परिसीमन विधेयकस्य विषये विपक्षि दलानि देशं भ्रामयन्ति, तेन अग्रे उक्तं यत् परिसीमन आयोगस्य निर्माणं भविष्यति तत् च राज्यानामानुसारं भविष्यति।

## कुर्नूल-दुर्घटना-: आन्ध्रप्रदेशे मार्गदुर्घटनायाम् अष्ट जनानां मृत्युः, राष्ट्रपत्यादिभिः शोकप्रकटनम्



आन्ध्रप्रदेशस्य कुर्नूल-मण्डले गतप्रातः मार्गदुर्घटनायां अष्ट जनाः मृताः, अन्ये च अनेके व्रणिताः। राष्ट्रपतिः द्रौपदी मुर्मुः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः, प्रधानमन्त्री नरेन्द्रमोदी च मृतकान् प्रति शोकं प्रकटितवन्तः।

## जनगणना २०२७: देशे गृह- सूचीकरणस्य प्रथमचरणस्य शुभारम्भः




गृह-सूचीकरणस्य, गृह-गणनायाः च कृते सप्तविंशत्यधिक द्विसहस्रतम वर्षस्य जनगणनायाः प्रथमः चरणः बहुविधराज्येषु केन्द्रशासितप्रदेशेषु च आरब्धः।

# अनुरागशर्मणा राज्यसभा-सांसदत्वेन शपथगृहणं कृतम्, हिमाचलस्य विषयान् उत्थापयितुं कृतः सङ्कल्पः




**हिमसंस्कृतवार्ताः- नवदेहली।** राज्यसभायां गुरुवासरे भारतीयजनतापार्टी-दलस्य अध्यक्षेण नितिन-नवीनेन सह १६ नवनिर्वाचितसदस्यैः सदनस्य सदस्यतायाः शपथगृहीतः। संसदः वर्तमान-आयव्ययक-सत्रस्य त्रिदिवसीय-विशेषोपवेशनस्य प्रथमदिने सदनस्य कार्यविधिः आरभते एव नवनिर्वाचितसदस्याः राज्यसभायाः सदस्यतायाः शपथं कारिताः। शपथग्रहीतृषु असमराज्यतः भारतीय- जनता- पार्टी- दलस्य त्रयः सदस्याः तेराश गोवाला, जोगेन मोहनः, प्रमोद बोरा च सम्मिलिताः सन्ति।

बिहारराज्यतः भाजपायाः नितिन नवीनः, शिवेश कुमारश्च, जनता दल यूनाइटेड इत्यस्य रामनाथ ठाकुरः तथा राष्ट्रिय लोक मोर्चा इत्यस्य उपेन्द्र कुशवाहा च सदस्यतायाः शपथं गृहीतवन्तः। छत्तीसगढ़तः भाजपायाः लक्ष्मी वर्मा, काङ्ग्रेसदलस्य फूलो देवी नेतम च शपथं गृहीतवत्यौ। हरियाणातः काङ्ग्रेसस्य कर्मवीर सिंह बौद्धः, भाजपायाः सञ्जय भाटिया च शपथं कारितौ। हिमाचलप्रदेशतः काङ्ग्रेसदलस्य अनुरागशर्मा, महाराष्ट्रतः भाजपायाः विनोद तावडे तथा ओडिशातः भाजपायाः सुजीत कुमारः सदनस्य सदस्यतां गृहीतवन्तः। तेलङ्गानातः काङ्ग्रेसस्य अभिषेक मनु सिंघवी, वेम नरेन्द्र रेड्डी च राज्यसभायाः सदस्यतायाः शपथं गृहीतवन्तौ। अनुरागशर्मणा अस्मिन् अवसरे हिमाचलप्रदेशस्य हितानां रक्षणाय कार्यं कर्तुं सङ्कल्पः कृतः, केन्द्रसर्वकारस्य समक्षं च हिमाचलस्य विषयान् प्रमुखतया उत्थापयितुं सर्वविधप्रयासं कर्तुं प्रतिज्ञा कृता। सः हिमाचलस्य वित्तीयस्थितेः कृते केन्द्रात् साहाय्यस्य, हिमाचले लम्बितानां रेलमार्ग-आधारभूतपरियोजनानां विषयान् च संसदि प्रखरतया उत्थापयितुं सङ्कल्पं कृतवान्। सः काङ्ग्रेसपक्षस्य शीर्षनेतृत्वं राहुल गान्धीं, सोनिया गान्धीं, काङ्ग्रेस-अध्यक्षं मल्लिकार्जुन खड़गेवर्यं, मुख्यमन्त्रिणं सुखविन्दरसिंहसुक्खुं च राज्यसभायै नामांकनार्थं धन्यवादं प्रकटितवान्। सः अवदत् यत् तस्य नामाङ्कनेन काङ्ग्रेसस्य आधारभूत-कार्यकर्तृषु नूतनोत्साहस्य सञ्चारः जातः, येन राज्ये काङ्ग्रेस-सङ्घटनं सुदृढं जातम्।

# मानववसत्यां सघनवनस्य अनुभवः, भोलाशर्मणः कण्ठे १६१ विहगानां स्वरवासः




**हिमसंस्कृतवार्ताः- मण्डी।** कथ्यते यत् यदि भवान् प्रकृतिं गभीरतया शृणोति, तर्हि सा भवता सह सम्भाषणं कर्तुं प्रभवति। सुन्दरनगर-रियासतस्य आराध्यदेवस्य 'माहुनाग' महोदयस्य कारिन्दः भोलाशर्मा अस्य तथ्यस्य जीवन्तमुदाहरणम् अस्ति। करसोग-क्षेत्रस्य मूलनिवासी ४५ वर्षीयः भोला शर्मा यदा कूजितुम् आरभते, तदा मानवीये आवासे अपि निबिडारण्यस्य प्रतीतिः जायते। सः न केवलं एकस्य द्वयोः वा, अपि तु १६१ दुर्लभपक्षिणां यथावत् ध्वनिं निष्कास्य विशेषज्ञान् अपि आश्चर्यचकितं करोति। भोलाशर्मणः एषा कला कस्यापि संस्थायाः न, अपि तु हिमालयस्य क्रोडे विकसिता अस्ति।

सः स्मरति यत् प्रायः चत्वारि दशकात् पूर्वं यदा सः स्वपितामहेन सह अजाः नीत्वा वनेषु गच्छति स्म, तदा पक्षिणां कलरवः तस्मै अतीव रोचते स्म। बाल्ये एव सः पक्षिणां स्वराणाम् उत्तरं दातुं प्रारब्धवान्, शनैः-शनैः च एषा युगलबन्दी एका विलक्षणा प्रतिभा संजाता। अद्य स्थितिः ईदृशी अस्ति यत् सः स्थानीयपक्षिणां अतिरिक्तं वन्यपशूनां गर्जनं स्वरं च तादृश्या एव तीक्ष्णतया निष्कासयति।

## प्रवासी-अतिथीनां भाषायामपि अस्ति अधिकारः

भोलाशर्मणः उत्साहः अत्रैव न विरमति; शीतकाले यदा सप्तसमुद्रपारात् 'प्रवासी-पक्षिणः' हिमाचलस्य सरांसि वनानि च प्राप्नुवन्ति, तदा भोला शर्मा घण्टापर्यन्तं एकान्ते उपविश्य तेषां स्वरान् ध्यानपूर्वकं शृणोति। तस्य विश्वासः अस्ति यत् सः एतेषां विदेशी- अतिथीनां स्वरम् अपि आत्मसातवान् अस्ति, अधुना च तान् यथावत् अनुकर्तुं शक्नोति। पर्यावरणसंरक्षणं प्रति भोलाशर्मणः एतत् समर्पणम् अद्भुतं वर्तते। सः स्वकीयां एतां कलाम् अग्रिमसन्ततिं प्रति नेतुं वाञ्छति येन बालकेषु पर्यावरणं प्रति संवेदनशीलता वर्धेत। अस्मिन् समये यदा यन्त्राणां कोलाहले पक्षिणां कूजनं विलुप्तं भवति, तदा भोला शर्मा इव कलाकाराः प्रकृतेः मौनध्वनिरूपेण उद्भूताः सन्ति।

**सन्देशः-** भोलाशर्मा वदति यत् "मम उद्देश्यं केवलं मनोरंजनं नास्ति, अपि तु कश्चन सन्देशः अस्ति। अद्य अस्माकं नियन्त्रणरहितायाः जीवनशैल्याः कारणात् बहवः पक्षिणः विलुप्ताः भवन्ति। अहं इच्छामि यत् बालकाः एतान् स्वरान् परिचिन्वन्तु, एतेभ्यः स्नेहं कुर्वन्तु, एतान् रक्षितुं च अग्रे आगच्छन्तु। यदा वयं तेषां भाषां बोधिष्यामः, तदैव तान् रक्षितुं भावना उत्पत्स्यते।"

# दक्षिण-चलच्चित्रजगतः महानायकः नागार्जुनः चित्रीकरणाय मनालीं प्राप्तवान्



**हिमसंस्कृतवार्ताः- कुल्लू।** कुल्लू-मनालीक्षेत्रे एषु दिनेषु चलच्चित्रजगतः क्रियाकलापाः तीव्राः अभवन्। दक्षिणभारतीय- चलच्चित्रजगतः महानायकः नागार्जुनः मनालीं प्राप्तवान् अस्ति। 'बड़ागढ़ रिसॉर्ट एण्ड स्पा' इत्यस्य निदेशकः नकुल खुल्लरः तस्य स्वागतं कृतवान्। अस्मिन् अवसरे तेन सह अभिनेत्री ऐश्वर्या रमेशः अपि उपस्थिता आसीत्। स्थानीय- समन्वयकेन अनिल कायस्थेन सूचितं यत् नागार्जुनः स्वस्य शततमस्य (100th) चलच्चित्रस्य चित्रीकरणाय अत्र आगतवान् अस्ति।

**प्रमुखबिन्दवः-**

- निर्माणम्- अस्य चलच्चित्रस्य निर्माणं अन्नपूर्णा स्टुडियो द्वारा क्रियते।
- निर्देशनम्- कार्तिक आर. महोदयः अस्य निर्देशनं करोति।
- छायाङ्कनम्- चित्रे छायाङ्कनकारः राजा महादेवनः अस्ति।
- चित्रीकरणस्थलानि- आगामिषु कतिपयेषु दिनेषु लाहौल-क्षेत्रस्य कोकसर, नग्गर, मनाली-नगरस्य च मनोहरेषु स्थलेषु चित्रीकरणं भविष्यति। मनाल्यां बॉलीवुड-दक्षिणचलच्चित्रजगतः तारकाणाम् आगमनं कुल्लू-मनाली क्षेत्रस्य पर्यटन- व्यवसायाय अपि लाभप्रदं भविष्यति इति आशा वर्तते।

# हासपरिहासम्




शिक्षकः छात्रं पृच्छतिः "भो छात्र! वदतु, 'अहं सुन्दरी अस्मि' इति कः कालः?"
छात्रः सस्मितं वदतिः "गुरुवर्य! एषः तु 'भ्रम कालः' अस्ति!"

# बिहारराजनीतिक्षेत्रे नीतीशयुगस्य समापनं सम्राटयुगस्य शुभारम्भश्च अभवत्







**हिमसंस्कृतवार्ताः- पण्डितनागेन्द्रकुमारपाण्डेयः, पटना**

"यः जातः सः गमिष्यति- राजा, रङ्कः, फकीरः सर्वे।" इयं लोकोक्तिः बिहारस्य अद्यतन- राजनीतिक- परिवर्तने सम्यगुपयुज्यते। परह्यः दिवसः बिहारराजनीतौ अतीव स्मरणीयः अभवत्। नीतीश कुमार महोदयस्य दीर्घकालीनः शासनकालः सदा स्मरणीयः भविष्यति, यतः तेन बिहारराज्याय नूतना दिशा, नूतना आशा, विकासस्य नूतनाध्यायश्च प्रदत्तः।

अद्य येषां वयः त्रिंशद्वर्षाधिकम् अस्ति, ते पूर्वकालस्य बिहारस्य स्थितिं सम्यक् ज्ञातवन्तः। तस्मिन् समये राज्ये अपराधाः, हिंसा, जातीयविभाजनं, सामाजिक-अशान्तिश्च सर्वत्र दृश्यन्ते स्म। मार्गाः जीर्णाः आसन्, विद्युत्सुविधा न्यूनाऽसीत्, शिक्षाक्षेत्रे च अव्यवस्था वर्तते स्म। चिकित्सालयेषु न पर्याप्तानि औषधानि आसन्, न चिकित्सकाः समये उपलब्धाः। समाचारपत्रेषु प्रतिदिनं हत्या, लुण्ठनम्, अपहरणम्, हिंसाचारस्य वार्ताः प्रमुखतया प्रकाशिताः भवन्ति स्म। सम्पूर्णदेशे बिहारस्य चर्चा विकासेन न, अपराधकारणेन भवति स्म।

अनन्तरं द्विसहस्रपञ्चमे वर्षे नीतीश कुमार महोदयस्य नेतृत्वे नूतनशासनस्य आरम्भः अभवत्। ततः शनैः शनैः बिहारः विकासमार्गे अग्रे गतवान्। विधिव्यवस्थायां सुधारः अभवत्, अपराधेषु नियन्त्रणं जातम्, उग्रवादस्य प्रभावोऽपि न्यूनीकृतः। महिलासशक्तीकरणाय बह्व्यः योजनाः प्रवर्तिताः। कन्यकाः सायकलयोजनया विद्यालयं गन्तुं प्रेरिताः अभवन्। छात्रवृत्तिः, पोशाकयोजना, छात्रावाससुविधा, स्वावलम्बनयोजनाश्च प्रारब्धाः। अद्य बिहारराज्ये महिलाः शिक्षायाम्, प्रशासनक्षेत्रे, आरक्षिसेवायाम्, अध्यापनक्षेत्रे च अग्रे दृश्यन्ते। पञ्चत्रिंशत्प्रतिशत-आरक्षणनिर्णयेन बिहारः राष्ट्राय प्रेरणास्रोतः अभवत्।

शिक्षाक्षेत्रेऽपि महत्त्वपूर्णो विकासः अभवत्। यदा प्रथमवारं शासनं प्राप्तम्, तदा बिहारस्य साक्षरतादरः न्यूनः आसीत्। अधुना सः पर्याप्तरूपेण वृद्धिं प्राप्तवान्। एतेन स्पष्टं भवति यत् शिक्षाक्षेत्रे विशेषकार्यं कृतम्। रोजगारक्षेत्रेऽपि बहवः प्रयासाः कृताः। शिक्षकनियुक्तयः, आरक्षिभर्तयः, विविधसरकारीनियुक्तयश्च सम्पन्नाः। विशेषतः युवजनानां कृते नूतनावसराः प्रदत्ताः। नीतीशकुमारमहोदयः स्वराजनीतिकजीवने अनेकान् आरोहावरोहान् अदर्शयत्। कदाचित् अस्मिन् गठबन्धने, कदाचित् अन्यस्मिन् गठबन्धने स्थित्वाऽपि सः दीर्घकालं बिहारस्य प्रमुखनेता अभवत्। प्रायः विंशतिवर्षपर्यन्तं शासनसूत्रं धारयित्वा सः स्वकीयप्रभावं स्थापितवान्। सः प्रायः विकासस्य, सुशासनस्य, सामाजिकसन्तुलनस्य च विषयान् अग्रे स्थापयति स्म। अतः जनमानसे तस्य शासनकालः एकस्य युगस्य रूपेण स्मर्यते।

यदा सम्राट चौधरी इत्यस्य नाम मुख्यमंत्रीपदे घोषितम्, तदा अनेकैः अनुभूतं यत् बिहारराजनीतौ दीर्घकालिकयुगस्य समापनम् अभवत्।

भारतीय जनता पार्टी अपि प्रथमवारं बिहारराज्ये स्वनेतृत्वे नूतनाध्यायं प्रारब्धवती इति मन्यते। अधुना द्रष्टव्यं यत् नूतना सरकारः बिहारं कस्यां दिशि नयति, विकासस्य गतिं कथं वर्धयति च। बिहारस्य जनता नूतनाशया, नूतनविश्वासेन च एतां सरकारं स्वागतं करोति।

# "लौकिकन्यायकोशः"

## "पटकुटीरन्यायः"

पर्याप्तः पटः अस्ति चेत् यत्र आवश्यकं तत्र पटकुटीरस्य अपि निर्माणं कर्तुं शक्यते। एवं साधनानाम् उपलब्धिः भवति चेत् किमपि साधयितुं शक्यते इति अनेन न्यायेन बोध्यते।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम्**




# वार्ता-संवादः

**नन्दिनीः** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये। चीनदेशे एकेन भोजनालयेन भोजनं प्रदातुं मुखनिरीक्षण-यन्त्रस्य प्रयोगः कृतः अस्ति।

**काव्याः** अहो, एतद् आधुनिकं विज्ञानम्! भोजनस्य शैली परिवर्तिता। किन्तु विज्ञानस्य हानिः अपि श्रुता। एका आरम्भिक-संस्था सहसा पिहिता, अन्तर्जाले तस्याः सर्वं विवरणं च लुप्तं जातम्। तेन कश्चित् तन्त्रांशज्ञः व्याकुलः जातः।

**नन्दिनीः** तन्त्रांशज्ञस्य कष्टं तु महद् अस्ति। विवरणं विना कार्यं न सिध्यति। कोलकातानगरे अपि एकः गृहस्वामी आरक्षकदले आवेदनस्य भयं प्रदर्शितवान् अस्ति। तेन एकेन युवकेन सह सख्याः मेलनं निषिद्धं कृतम्।

**काव्याः** सा निषिद्धा पद्धतिः रूक्षतमा अस्ति। व्यक्तिगत- स्वतन्त्रतायाः रक्षणं कर्तव्यम्। परं शिष्टाचारस्य अपि आवश्यकता अस्ति। एकेन शिक्षकेन स्वकीयः छात्रः चलच्चित्राय आहूतः। तस्य संवादः जाले प्रसारितः अस्ति, येन जनाः क्रुद्धाः सन्ति।

# मुख्य-रक्षा-अध्यक्षः जनरल-अनिल-चौहानः 'सूर्य-देवभूमि-चुनौती-द्वितीय' इत्यस्मै हरित-सङ्केतं प्रायच्छत्



मुख्य-रक्षा-अध्यक्षः जनरल-अनिल-चौहानः उत्तराखण्डस्य गढवाल-हिमालयी-क्षेत्रे 'सूर्य-देवभूमि-चुनौती-द्वितीय' (सूर्य देवभूमि चैलेंज-2) इत्यस्य हरित-सङ्केतम् अदर्शयत्। भारतीय-सेन्या आयोजितस्य अस्य कार्यक्रमस्य उद्घाटनं बद्रीनाथतः अभवत्। ११३ किलोमीटर्मिता एषा यात्रा कल्पेश्वर-रुद्रनाथ-तुङ्गनाथ-इति त्रिषु पवित्र-केदारेषु संचरिष्यति। अस्याः उपक्रमस्य उद्देश्यं साहसिक-क्रीडानां माध्यमेन परम्परा-संरक्षणं, पर्यटनं, क्षेत्रीय-विकासं च प्रवर्धयितुम् अस्ति।'जीवन्त-ग्राम-कार्यक्रमान्तर्गतम्' अस्मात् आयोजनात् सीमावर्ति-ग्रामेषु पर्यटनस्य वृद्धेः रोजगार-अवसराणां च सृजनस्य आशा अस्ति। एतत् राष्ट्रनिर्माणं जनभागं च प्रति सेनायाः प्रतिबद्धतां अपि दर्शयति।यात्राकाले जनरल-चौहानः श्रीबद्रीनाथ-धाम्नि पूजा-अर्चनां कृतवान् तथा च तीर्थयात्रिकाणां कृते यात्रा-व्यवस्थानां समीक्षां कृतवान्। तदनन्तरं सः उत्तरकाशी-मण्डलस्य 'हर्षिल' इति क्षेत्रं गतवान्, यत्र सः एकस्य सांस्कृतिक-विरासत-केन्द्रस्य आधारशिलां स्थापितवान्। अस्य केन्द्रस्य उद्देश्यं क्षेत्रस्य समृद्धां सांस्कृतिक-परम्परां संरक्षितुं, गढवालस्य गौरवशाली-इतिहासस्य प्रदर्शनं तथा च पर्यटनस्य प्रोत्साहनं अस्ति।सः 'वाइब्रेंट विलेजेज' (Vibrant Villages) इति ग्रामिणैः सह संवादं कृतवान् तथा च राष्ट्रनिर्माणे सीमावर्ति-क्षेत्राणां विकासे च तेषां सक्रिय-भूमिकायाः प्रशंसां कृतवान्

# राष्ट्रपतिः द्रौपदी मुर्मु मातृभाषायाः सर्वोपरि स्थापने बलं दत्तवती



राष्ट्रपतिः द्रौपदी मुर्मु अवदत् यत् सर्वाः अन्याः भाषाः शिक्षणीयाः, परन्तु स्वमातृभाषा न विस्मर्तव्या। स्वभाषा सर्वदा सर्वोपरि स्थापनीया। राष्ट्रपतिः मुर्मु महाराष्ट्रस्य वर्धायां महात्मागान्धि-अन्तर्राष्ट्रिय-हिन्दी-विश्वविद्यालयस्य षष्ठे दीक्षान्त-समारोहे सम्बोधनं कुर्वती आसीत्।राष्ट्रनिर्माणे भारतीयभाषाणां महत्त्वं प्रतिपादयन्ती राष्ट्रपतिः उक्तवती यत् अस्माभिः एकस्य सुदृढस्य, आत्मनिर्भरस्य, विकसितस्य च भारतस्य निर्माणं करणीयम्, एतत् च केवलं भारतीयभाषाणां आधारेणैव सम्भवम् अस्ति। सा अवदत् यत् राष्ट्रिय-शिक्षा-नीतिं (NEP) विहाय अनेकासाम् उपक्रमाणां बलेन अस्माकं देशः सम्यक् दिशि अग्रे सरति।हिन्दीभाषायाः संवर्धने महात्मागान्धि-अन्तर्राष्ट्रिय-हिन्दी-विश्वविद्यालयस्य भूमिकायाः विषये राष्ट्रपति-मुर्मु-वर्या अवदत् यत् इतः भारतीयभाषया अन्तर्राष्ट्रियसाहित्येन च सह हिन्दीभाषायाः साहित्यस्य अपि प्रचार-प्रसारः करणीयः। सा छात्रान् भारतीयभाषाणां सम्मानं कर्तुं भारतीय-ज्ञान-परम्परायाः पुनरुद्धारं कर्तुं च साग्रहं न्यवेदयत्। सा असूचयत् यत् वर्धायामेव महात्मागान्धि-नेताजी सुभाषचन्द्रबोस-काका कालेलकर-महोदयैः 'राष्ट्रभाषा-प्रचार-समितिः' स्थापिता आसीत्।